केशाङ्गारांस्तथा भस्म भुजगं निर्जलां महीम्।
दृष्ट्वा स्वप्ने दशाहन्तु मृत्युरेकादशेऽहनि ॥
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः।
पाषाणैस्ताड़ितः स्वप्ने सद्यो मृत्युं समाप्नुयात्।
सूर्य्योदये यस्य शिवा क्रोशन्ती याति सम्मुखम्।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति ॥
यस्य वै भुक्तमात्रेऽपि हृदयं पीड्यते क्षुधा।
जायते दन्तसंघर्षः स गतायुरसंशयम् ॥
दीपादिगन्धं नो वेत्ति त्रसत्यग्निं तथा निशि।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति ॥
शक्रायुधञ्चार्द्धरात्रे दिवा ग्रहगणं तथा।
दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवान् ॥
नासिका वक्रतामेति कर्णयोर्नमनोन्नती।
नेत्रञ्च वामं स्रवति यस्य तस्यायुरुद्गतम् ॥
आरक्ततामेति मुखं जिह्वा वापि सिता तथा।
तदा प्राज्ञो विजानीयान्मृत्युमासन्नमात्मनः ॥
उष्ट्ररासभयानेन यः स्वप्ने दक्षिणां दिशम्।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर ! ॥
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम्।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति ॥
पततो यस्य वै गर्त्ते स्वप्ने द्वारं पिधीयते।
न चोत्तिष्ठति यः श्वभ्रात्तदन्तं तस्य जीवितम् ॥

ऊर्द्ध्वा च दृष्टिर्न च संप्रतिष्ठा
रक्ता पुनः संपरिवर्त्तमाना।
मुखस्य चोष्मा शुषिरा च नाभिः
शंसन्ति पुंसामपरं शरीरम् ॥

स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते नरः।
जलप्रवेशादपि वा तदन्तं तस्य जीवितम् ॥
यश्चाभिहन्यते दुष्टैर्भूतै रात्रावथो दिवा।
स मृत्युं सप्तरात्रान्तात् पुमानाप्नोत्यसंशयम् ॥
स्ववस्त्रममलं शुक्लं रक्तं पश्यत्यथोऽसितम्।
यः पुमान् मृत्युमापन्नं तस्यापि हि विनिर्द्दिशेत् ॥
स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्य्ययः।
कथयन्ति मनुष्याणां यमासन्नौ यमान्तकौ ॥
येषां विनीतः सततं यस्य पूज्यतमा मताः।
तानेव योऽवजानाति तानेव च विनिन्दति ॥
देवता नार्च्चयेद्वृद्धान् गुरून् विप्रांश्च निन्दति।
मातापित्रोरसत्कारं जामातृणां करोति यः ॥
योगिनां ज्ञानविदुषामन्येषाञ्च महात्मनाम्।
प्राप्तान्तकालः पुरुषस्तद्विज्ञेयं विचक्षणैः ॥
योगिना सततं यत्नादरिष्टान्यवनीपते !।
संवत्सरान्ते तत्रैव फलदानि दिवानिशम्।
विलोक्यानि सदा चैव मनःपङ्क्तिषु भीरुणा ॥”
इति मार्कण्डेयपुराणे अलर्कोपाख्याने ४३ अः ॥
कर्म्मविशेषान्मृत्युविशेषो यथा,—
“वेदानृतानि नोक्तानि प्रीतिभेदः कृतो नच।
आस्तिकः श्रद्दधानश्च स सुखं मृत्युमृच्छति ॥
आगारदाहिनो दाहं क्षुधं चान्नप्रदायिनः।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते ॥
देवताश्चपूजायां ये रताश्चानसूयवः।
ऋजवो वदान्या ह्रीमन्तस्ते नराः सुखमृत्यवः ॥
यो न कामान्न संरम्भान्न द्वेषाद्धर्म्ममुत्सृजेत्।
यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति ॥
शीतं जयन्तीन्धनदास्तापं चोदकदायिनः।
प्राणघ्नीं वेदनां कष्टां ये चान्ये द्वेषकारिणः ॥
मौढ्याज्ञानप्रदातारः प्राप्नुवन्ति महद्भयम्।
कूटसाक्षी मृषावादी यश्चासदनुशास्ति वै।
ते मोहमृत्यवः सर्व्वे तथान्ये वेदनिन्दकाः ॥”
इति मार्कण्डेयपुराणे पितापुत्रसम्वादे १० अध्यायः ॥ * ॥
मृत्युकालकर्त्तव्यक्षुद्रजन्तुवधप्रायश्चित्तं यथा,—
“वधेऽपि क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः।
कार्षापणं ससुतृणञ्च मृत्युकाले प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे शतगुणं ध्रुवम्।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
मृत्युसमये गङ्गागमनमावश्यकं यथा,—
“अहो सगरवंशेभ्यो निर्व्वाणमुक्तिदायिनी।
वैकुण्ठगामिनां मार्गसोपानरूपिणी वरा ॥
अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम्।
आदौ पादौ च विन्यस्य मुखे तोयं प्रदीयते ॥
गङ्गासोपानमारुह्य सन्तो यान्ति ममालयम् ॥”
इति तत्रैव ३४ अध्यायः ॥ * ॥
जन्मवतां मृत्योरपरिहार्य्यत्वं यथा,—
“मृत्युर्जन्मवतां वीर ! देहेन सह जायते।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥”
इति श्रीभागवते १० स्कन्धे १ अध्यायः ॥
अपि च।
“जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥”
इति श्रीभगवद्गीता ॥ * ॥
अकालमृत्युप्रशमनं स्तोत्रं यथा,—
सूत उवाच।
“स्तोत्रं तत् संप्रवक्ष्यामि मार्कण्डेयेन भाषितम्।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम्।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति ॥ १ ॥
गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम्।
केशवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ २ ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम्।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ३ ॥
शङ्खचक्रधरं देवं छन्नरूपिणमव्ययम्।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ४ ॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम्।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ५ ॥
पुरुषं पुष्करं पुण्यं क्षेमबीजं जगत्पतिम्।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ६ ॥
सहस्रशीर्षं देवेशं व्यक्ताव्यक्तं सनातनम्।
महायोगं प्रपन्नोऽस्मि किन्नो मृत्युः करिष्यति ॥ ७ ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम्।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ८ ॥
इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः।
अपयातस्ततो मृत्युर्विष्णुदूतैः प्रपीड़ितः ॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता।
प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥
मृत्य्वष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम्।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥
य इदं पठति स्तोत्रं त्रिकालं नियतः शुचिः।
नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥

हृत्पद्ममध्ये पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम्।
विचिन्त्य सूर्य्यादतिराजमानं
मृत्युं स योगी जितवांस्तदेव ॥”

इति गारुड़े २३८ अध्यायः ॥ * ॥
शुभकर्म्मप्रतिबन्धकमृत्युदा योगा यथा,—
“आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा ॥”
अपि च।
“रव्यादिदिवसैर्युक्ता विशाखादिचतुष्कतः।
उत्पाता मृत्यवः काणा अमृतानि यथाक्रमम् ॥”
इति ज्योतिस्तत्त्वम् ॥

मृत्युञ्जयः, पुं, (मृत्युं जितवान्। जि + खच् + मुम् च।) शिवः। इत्यमरः ॥ तन्नामकारणं यथा,—
सुयज्ञ उवाच।
“शिवो लीनो निर्गुणे चेत् श्रीकृष्णे प्राकृते लये।
कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतौ ॥”
सुतपा उवाच।
“ब्रह्मणोऽन्ते मृत्युकन्या प्रनष्टा जलबिन्दुवत्।
संहर्त्री सर्व्वलोकानां ब्रह्मादीनां नराधिप ! ॥
कतिधा मृत्युकन्यानां ब्रह्मणां कोटिशो लये।
कालेन लीनः शम्भुश्च सत्त्वरूपी च निर्गुणे ॥
मृत्युकन्या जिता शश्वत् शिवेन गुरुणा मम।
न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥
रोगशान्त्यर्थं तस्य पूजाविधिर्यथा,—
“मृत्युञ्जयं समापूज्य लिङ्गं त्रिभुवनेश्वरम्।
रोगार्त्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥
यस्तु संपूजयेद्भक्त्या लिङ्गं मृत्युञ्जयाभिधम्।
यमोऽपि प्रणमेद्भक्त्या किं करिष्यति चामयः ॥
तस्य पूजाविधिं वक्ष्ये शृणु मत्प्राणवल्लभे !।
जातिभेदे स्फटिकाश्म रवीन्वाशीतितोलकम् ॥
निर्म्माय पार्थिवं लिङ्गं काष्ठाधारे निवेशयेत्।
पौराणिकेन मन्त्रेण कुर्य्याच्च गठनं बुधः ॥
स्नापयेत् पञ्चगव्येन प्रत्येकस्याष्टतोलकम्।
स्वस्वमन्त्रेण प्रत्येकद्रव्येण स्नापयेत् सुधीः ॥
रोगक्षयकामनया नामगोत्रादिपूर्व्वकम्।
उपविश्यासने विप्रो धृत्वा धौते च वाससी ॥
रुद्राक्षमालां कण्ठे वै धृत्वा भस्मत्रिपुण्ड्रकम्।
उपचारं षोड़शकं देयं भक्त्या प्रयत्नतः ॥
सुवर्णस्यासनं देयं तथैवाभरणानि च।
वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा भवेत् ॥
मधुपर्कं कांस्यपात्रे दद्याद्भोजनयोग्यकम्।
बिल्वपत्रसहस्रञ्च अभग्नं विनिवेदयेत् ॥
एवं संपूज्य लिङ्गैकं जपेन्मन्त्रं सहस्रकम्।
ततो होमं प्रकुर्य्याच्च दक्षिणां ब्राह्मणे ददेत् ॥